(साहित्य)

शास्त्री-तृतीय-खण्ड;

पूर्वमेघदूतम्

व्याख्या-भाग-

① → शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥

प्रसंग → पद्यमिदं महाकवि कालिदास प्रणीतस्य मेघदूताख्यखण्ड-काव्यस्य पूर्वमेघ भागात् उद्धृतोऽस्ति । अत्र यक्षो मेघं कथयति यद् वायुपूरिता: कीचकाः कर्णप्रियं शब्दं कुर्वन्ति, किन्नर-स्त्रियः शिवस्य त्रिपुरविजयस्त्रोतं गायन्ति । गुहासु तव निर्घोषः मृदंगध्वनिरिव स्याच्चेत् शिवस्य संगीतः पूर्णो भविष्यति ।

व्याख्या → हे मेघ! अनिलैः = मारुतैः, वायुभिरित्यर्थः । ("वायुर्मातरिश्वा सदागतिः । पृषदश्वो गन्धवहो गन्धवाहानिला शुगाः । समीर मारुत मरुज्जगत्प्राणाः" इत्यमरः) पूर्यमाणाः = पूरिताः कीचकाः = वेणु-विशेषाः, मधुरम् = श्राव्यम्, शब्दायन्ते = स्वनन्ति । संसक्ताभिः = संयुक्ताभिः, किन्नरीभिः = किन्नरवनिताभिः, त्रिपुरस्य = त्रिपुरासुरस्य, विजयः = वधः, गीयते = गानं विधीयते । कन्दरेषु = गुहासु ते = तव मेघस्य, निर्ह्रादः = निर्घोषः, मुरजे = मृदंगे, ध्वनिः = शब्द इव स्यात् = भवेत्, चेत् = यदि, तर्हि तत्र = चरणन्यासं निकषा । पशुपतेः = भगवतः शिवस्य, संगीतार्थः = संगीतवस्तु, समग्रः = सम्पूर्णः, भावी = भविष्यति, ननु = खलु । अत्र पद्ये कीचकशब्द-किन्नरीगान-मेघनिर्ह्रादानां त्रयाणामप्येकत्रैव शिवचरणचिंह्न निकषा स्थितत्वात् पर्यायः "मुरज इव" इत्यत्र श्रौती उपमा, उभयोश्चाङ्गांगभावात् संकरः । मन्दाक्रान्ता वृत्तम् ॥

Renu Devi
03/06/2021
राधा उमाकान्त सं० महा०वि०
सुखमैना पूर्णियाँ

(साहित्यम्) तृतीय-पत्रम्

उपशास्त्री
द्वितीय-खण्ड

रघुवंश महाकाव्यम् - द्वितीय सर्गः

प्रश्न :- रघुवंशमाश्रित्य "सिंह-दिलीपयोः संवादः" संक्षेपेण लिखत ।

उत्तर :- पुत्रकामी महाराजा दिलीपः वसिष्ठस्य नवप्रसूता नन्दिनी सेवाकर्तुम् प्रारब्धा। एकदा स्वानुचरस्य दिलीपस्य अन्तर्भावम् जिज्ञासमाना नन्दिनी हिमालय-कन्दरामाविवेश। राजा दिलीपः पर्वतशोभामवलोकयन् आत्मविस्मृतः सन आसीत्। तदैव कश्चित् सिंहः झटिति नन्दिनीमाक्रान्तवान्। नन्दिन्याः आर्तनादेन आकृष्टो दिलीपः कन्दरायाँ अवस्थितं सिंहं दृष्ट्वा यदा तूणीरात् वाणः निष्कासयितुम् स्वदक्षिणहस्तांगुलीः नियोजयामास तत्रैव अंगुलयः संश्लिष्टाः अभवन्। भित्तौ लिखितं चित्रमिव राजा निश्चेष्टो बभूव। निजभुजस्तंभेन दिलीपः विस्मयमाप्तवान्। विस्मितं दिलीपं दृष्ट्वा सिंह मानुषी वाचमवलम्ब्य तं सम्बोधयामास —

अलं महीपाल! तव श्रमेण प्रयुक्तमप्यस्त्रमितोवृथा स्यात् ।
न पादपोन्मूलन शक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य ॥

स्वपरिचयं दत्वा सिंहः पुनः कथयति यत् भवान् मादृशान् रुद्रानुचरान् विनाशयितुं न शक्नोति। अतः मयि अस्त्र प्रक्षेपणे प्रयासो न विधेयः। शिवानुचरोऽहं वनवासिगजानां भयप्रदर्शनार्थम् अस्मिन गह्वरे नियोजितोऽस्मि। अतः त्वं लज्जां त्यक्त्वा निवर्तस्व। किमपि साध्यं नास्ति तव श्रमेण।

एतद् वचनं श्रुत्वा राजा दिलीपः सिंहं सादरं निवेदयामास- हे शिवानुचर सिंह! भगवतः शंकरस्याज्ञा मयापि धार्यते। परो इदमपि अग्रतः पश्च गोरूपं च परित्यज। इत्युक्त्वा दिलीपः स्वशरीरं सिंहस्याग्रे समर्पितवान्। तस्मिन्नेवकाले नतमस्तकं दिलीपस्योपरि हिमालयवासिनो विद्याधराः पुष्पाणि ववृषुः। ततः हे वत्स! उत्तिष्ठ, वरं वृणीष्व इति अमृतोपमं गोवचनं श्रुत्वा उत्थितो राजा सिंहम् न ददर्श।

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ। Renu Devi 03/06/2021

का० सिं० द० सं० विश्ववि० दरभंगा।

# अभिज्ञानशाकुन्तलम्

शेष पृष्ठ

स्मरणीयमाद्श्योऽस्ति। महर्षि कण्वस्योपस्थितो राक्षसाः तपोवने नैवागच्छन्ति तदनुपस्थिता वैनोपद्रवं कुर्वन्ति। सः तपोबल प्रभावेन त्रिकालज्ञः स अतएवादिति: वदति- तपः प्रभावात् प्रत्यक्ष सर्वमेव तत्र भवतः कण्वस्येति।

Renu Devi
03/06/2021
राधाउमाकान्त सं० महाविद्यालय सुरसेना, पूर्णिया।

शास्त्री - I खण्ड साहित्यं
प्रतिपदा अभिज्ञानशाकुन्तलम्

प्र० (1) महर्षेः कण्वस्य चरित्र-चित्रणं विधीयताम् ?

उत्तरम् – मुनीनां दशसहस्रं योऽन्नपानादिपोषणात् । अध्यापयति
विप्रर्षिरसौ कुलपतिः स्मृतः । इति वचनानुसारेण महर्षिः कण्वः
आश्रमस्य कुलपतिः वर्तते । तस्यापरं नाम काश्यप इति । अयं
नैष्ठिक ब्रह्मचारी महर्षिः मारीचिनन्दनकश्यपस्य पुत्रः आसीत् ।
तस्य पावनः आश्रमः मालिनीतटे तथा यज्ञशालया अलंकृतो-
ऽस्ति । श्रौतविधिना प्रत्यहमग्निहोता महर्षिः वर्तते । अयमनु
तम तपोवने त्रिकालस्य रहस्यं हस्तामलकवद्वेत्ति । अतएवाग्नि
शालायां - आकाशवाण्या ज्ञातम् यत् दुष्यन्तेन सह विहितगान्ध
र्वविवाहा शकुन्तला गर्भवती जातेति । तत्तपोबलप्रभावात्
शकुन्तलायाः पतिगृहगमनकाले प्रभाविता वृक्षाः वनदेव
श्च विविधानि दिव्यानि वस्त्राभूषणानि समर्पयन् । शकुन्त
महर्षेः कण्वस्य पोष्यपुत्री अस्ति । स मातृपितृविहीना शकु
न्तलामौरसपुत्रीमिव पालयति ।

शकुन्तलायाः प्रतिकूलं दैवं शान्तयितुं स सोमतीर्थस्य
यात्रां करोति शकुन्तलायाः शालीनतया परसन्तुष्टत्वा
स्वागतपरिस्थितौ सः अतिथिसत्कारभारं व्यवहारदक्षां शकु
न्तलां समर्पयति । तस्याः पतिगृहगमनवेलायां तस्य ममतोद्
ऽभवत् । पितृतुल्यः शोकः तं व्यथयति, कण्ठोऽवरुद्धः
तदीयविरहवेदनया हृदयं जडीभूतं, बाष्पपरिपूर्णं नेत्रं दृ
शून्यं जातम् दुःखप्रवाहं रोद्धुमशक्यः तपस्वी स्वमनसि
चिन्तयति यत् अरण्यनिवासिनः मम तपस्विनः मनुष्य
कन्याप्रेम्णा दैन्यं जातं तथा सांसारिकजनानां का दश
भविष्यति, “वत्से ! एवं जडीकरोषि ।” अपयास्यति म
कः कथं वात्सल्यपूर्णाः सन्ति । वस्तुतः शकुन्तलां प्रति
तस्य वात्सल्यं निःस्वार्थम् अनुकरणीयं तथा –

P.T.O

साहित्यम् - तृतीय - पत्रम् - उपशास्त्री - प्रथम खण्ड

DOMS Page No. Date 12/05/20

रघुवंश महाकाव्यम् - द्वितीय सर्गः

② प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥

प्रसंग → प्रस्तुत श्लोकः महाकवि कालिदासरचित रघुवंश - महाकाव्यस्य द्वितीयसर्गात् समुद्धृतोऽस्ति । अस्मिन् श्लोके सुदक्षिणा नन्दिन्याः सविधिं पूजामकरोत् ।

व्याख्या → साक्षतपात्रहस्ता = अखण्ड तन्दुल भाण्डकारा : सुदक्षिणा = दिलीपपत्नी, पयस्विनीं = प्रशस्तक्षीरां, तां = नन्दिनीम्, प्रदक्षिणीकृत्य = परितो भ्रमणं कृत्वा, प्रणम्य च = प्रणामं कृत्वा, च, अस्याः = धेन्वाः विशालं = विस्तीर्णम्, शृङ्गान्तरं = विषाणमध्यम्, अर्थसिद्धेः = प्रयोजन निष्पत्तेः, द्वारम् = मार्गम्, इव = यथा, आनर्च = पूजयामास ।

③ → इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥

प्रसंग → अयं श्लोकः महाकवि कालिदासरचित रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके राजा दिलीपस्य निर्विघ्न सेवायाम् एकविंशतिः दिनानि निर्गतानि ।

व्याख्या → इत्थम् = प्रकारेण, प्रजार्थं = सन्ततिप्रयोजनकम्, महिष्याः = कृताभिषेकया पत्न्या सुदक्षिणया, समं = सार्द्धं, व्रतं = नियमं, धारयतः महनीयकीर्तेः = प्रशस्ययशः, दीनोद्धरणोचितस्य = दीनजनरक्षण तत्परस्य, तस्य = दिलीपस्य, त्रिगुणानि = त्रिगुणावृत्तानि = सप्तसंख्यानि, निवसानि, व्यतीयुः = व्यतीचक्रमुः ।

Renu Devi
03/06/2021

राधाउमाकान्त संस्कृत महाविद्यालय
सुरवसेना, पूर्णिया